| ख | घ | छ | झ | ठ | ढ | थ | ध | फ | भ | र | व | ष | ह | कृष्णपक्ष अधरवर्ण |

कस्यां दिशि तद्द्रव्यं तदाह :-

**आलिङ्गितानेहसि वर्णपिण्डे श्रेणीहते नागहृतेऽवशेषात्।**
**पूर्वादिदिक्चेदभिधूमितं स्यादर्कघ्नमात्राङ्कयुगर्णपिंडे ॥७॥**
**प्रश्नाक्षराढ्ये गजशेषिते स्यात्पूर्वादिदिक्चेदिह दग्धवेला।**
**स्यात्केवले पिंड इभाप्तशेषे पूर्वादिदिक् नष्टधने च चौरे ॥८॥**

नष्ट द्रव्य की दिशा के ज्ञान का प्रतिपादन करते हैं, यदि आलिङ्गित वेला में प्रश्न होवे तो पिण्ड को प्रश्नवर्णसंख्या से गुणा करें, उसमें आठ का भाग देना, एकादि

शेष करके पूर्वादि दिशा जान लेना, यदि अभिधूम्र वेला में प्रश्न होवे तो द्वादश गुणित मात्रापिण्ड को वर्णपिण्ड में युक्त करना, फिर श्रेणीसंख्या युक्त करके उसमें आठ का भाग देना, शेषांक से पूर्वादि दिशा जान लेना, यदि दग्ध वेला में प्रश्न होवे तो केवल पिण्ड में ही आठ का भाग देना शेषांक से नष्टद्रव्य चौर की दिशा जान लेना। यथा - वर्णपिंडे ३२ श्रेणी ४ हते १२८ नाग ८ हृते शेषं ८ ईशदिक् जाता। अभिधूमितकालः स्यात्तदाऽर्क १२ घ्नमात्रांकै ९ र्जातै १०८ र्युक्तेऽर्ण ३२ पिण्डे १४० श्रेणी ४ युते १४४ नागहृते शेषं ८ ईश दिक्। दग्धवेला स्यात्तदा केवले पिण्डे ४१ इभा ८ प्त शेषे १ पूर्वदिक् जाता ॥७॥८॥

अथ चौरसंख्यामाह।

**संयुक्ताद्यष्टभिः प्रश्नैश्चौरसंख्यां वदेद्बुधः।**
**सांगाब्ध्य ४६ र्णाङ्काद्यजङ्काहति नागहृता तथा॥९॥**

संयुक्तादि आठपक्ष करके पण्डितों को चोर की संख्या का कथन कहना चाहिये। यथा - संयुक्त प्रश्न होवे तो एक चोर कहना, असंयुक्त प्रश्न होवे तो दो चोर कहना, इसी प्रकार से समझ लेना, वर्णपिंड में षटचत्वारिंशत् (छियालीस) ४६ युक्त करें, फिर श्रेणी के प्रथम वर्ण में जो स्वर होवे उसकी संख्या से गुणा करें उसमें आठ का भाग दे शेषांक से चोर संख्या कहना। यथा साङ्गाब्धय ४६ श्च ते वर्णाङ्का ३२ श्च ७८ तेषामाद्येज् आकारस्तस्य अङ्का द्वौ २ अनयोर्हति १५६ नाग ८ हृता ४ जाताश्चौरसंख्या चत्वारश्चौराः॥९॥

**९ श्लोकोक्तं चक्रम्।**

| संयुक्त | असंयुक्त | अभिहित | अनभिहित | अभिघात | आलिङ्गित | अभिधूम्र | दग्ध | पक्षाः |
|---|---|---|---|---|---|---|---|---|
| १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | चौराः |

मुख्यचौरस्य नामज्ञानमाह।

**उत्तरार्णाऽधराज्योगेऽसमांकव्यत्ययेऽन्यथा।**
**समांकं स्यादुत्तरयोः परयोर्विषमार्णयुक्॥**
**पिंडं सप्तहतं वा स्यात्संख्या तन्नाम वर्णजा॥१०॥**

यदि प्रश्नश्रेणी का प्रथम वर्ण उत्तर होवे और मात्रा अधर होवे तो विषमाक्षर नाम कहना, अधर वर्ण और उत्तर स्वर होवे तो समाक्षर नाम कहना, स्वरवर्ण दोनों

उत्तर होवे तो समाक्षर नाम कहना। स्वरवर्ण दोनों अधर होवे तो विषमाक्षर नाम कहना चाहिए। पिण्डद्वार का वर्णन करते हैं - पिंड ६९७ सप्त ७ हृतं शेषं ४ जाता नामवर्णसंख्या। इति ॥१०॥

प्रथमाक्षरज्ञानमाह।

**चोरमितिघ्ना श्रेणीपिण्डे नाड्याऽष्टभि ८ स्तष्टा।**
**क्र १ ष्टा ८ गा ७ ङ्गे ६ ष्व ५ त्र्य ३ ब्ध्य४ श्वि २ मितैः शेषितैर्ज्ञेयः।**
**आदिष्वादिमवर्णो वर्गेषु प्रौढचौरस्य ॥११॥**

चोरसंख्या गुणित श्रेणी को पिंड में युक्त करें उसमें आठ का भाग देना शेषांक से अवर्गादि वर्गो का वर्ण मुख्य चौर के नाम का प्रथम वर्ण होगा, ऐसा समझना चाहिये। यथा- श्रेणि ४ चौरप्रमाणेन ४ गुणिता १६ पिंडेन ४१ युक्ता ५७ अष्ट ८ तष्टा १ प्रौढचौरस्य एकशेषे सति अवर्गे नाम्न आदिवर्णः ॥११॥

इति केरलीप्रश्नसुन्दरीटीकायां चौरप्रश्नम्।

अथ गमनप्रश्नमाह।

**अधराजाद्यर्णयुतौ शीघ्रं गमनं न चोत्तराज्युक्ते।**
**पिण्डाष्टहतिः शैलैस्तष्टायानं समांकैः स्यात् ॥१२॥**

यदि प्रश्नश्रेणी के प्रथम वर्ण में अधरमात्रा होवे तो शीघ्र गमन कहना, उत्तर मात्रा होवे तो गमन नहीं कहना, पिण्ड को आठ से गुणा करें, उसमें सात का भाग देना, शेष समाङ्क होवे तो गमन कहना, विषमांक होवे तो गमन नहीं कहना चाहिये। यथा पिण्डस्य ४१ अष्टभि ९ र्हतिः ३२८ शैलै ७ स्तष्टे ६ समांकैर्यानं स्यात् ॥१२॥

अथागमनप्रश्नमाह।

**वर्णाङ्का द्विगुणास्त्रिघ्ना मात्रांकाढ्या द्विभाजिताः।**
**एकेनागमनं शीघ्रं शून्येन स्याद्विलम्बतः ॥१३॥**

वर्णपिण्ड को द्विगुणित (दुगना) करें, उसमें त्रिगुणित मात्रापिण्ड को युक्त करके दो से भाग देना एक बचे तो शीघ्र आगमन कहना, शून्य शेष होवे तो विलंब से आगमन कहना। यथा- वर्णाङ्काः ३२ द्विगुणाः ६४ त्रिघ्ना मात्रांक २७ युता ९१ द्विभक्ताः शेषं १ शीघ्रमागमनम् ॥१३॥

अथ रोगिप्रश्नमाह।

**स्याज्जीवनं व्याधिमृतिक्रमेण चालिङ्गिताद्यैरधरादिराशिः।**
**कृत्वा धराद्यर्णयुतो युतिःस्यात्परे धराङ्कै रहितोऽन्यराशिः।**
**स्वराङ्कयुक्तो हरिवर्त्मभक्तः सौख्यं रुजा वा मरणं क्रमेण ॥१४॥**

प्रश्नश्रेणी के आद्यर्ण में आलिङ्गित मात्रा होवे तो रोगी को साध्य कहना, अभिधूम्र मात्रा होवे तो कष्टसाध्य कहना, दग्ध मात्रा होवे तो मृत्यु कहना। इसका वर्णन पिण्डद्वारा कहते हैं। उत्तराधरवर्णजन्य पिण्ड को पृथक्-पृथक् स्थापित करें, श्रेणी के आद्यर्ण में अधर वर्ण होवे तो दोनों का योग करें, श्रेणी केआद्यर्ण में क उत्तर वर्ण होवे तो अधर पिण्ड को उत्तर पिण्ड में हीन करें, जो उत्तर पिण्ड न्यून होवे तो योग करें, फिर स्वरांक युक्त करके उसमें तीन का भाग दे एकादि शेष करके १ साध्य २ कष्टसाध्य ३ मृत्यु कहना चाहिये। यथा- अत्र उत्तराद्यर्णयुते सति अधरांकैः ९ अन्यराशिः २३ रहितः १४ स्वरांकै ९ र्युक्ते २३ हरिवर्त्मना ३ भक्तः शेषै २ रुजा नाम कष्टसाध्य इति ॥१४॥

अथ रोगज्ञानमाह।

**वर्गाङ्काः श्रेणिघ्ना वर्णाङ्का मात्रिकाङ्कहताः।**
**युक्ता युगतष्टा स्याद्वातः पित्तं कफो दोषः ॥१५॥**

प्रश्नश्रेणी के वर्गांक को श्रेणीसंख्या से गुणा करें, और वर्णपिण्ड के मात्रापिण्ड से गुणा करें, फिर दोनों का योग करके चार का भाग दें। यदि शेष एक रहे तो वातरोग, दो शेष बचे तो पित्तरोग, तीन रहे तो कफ रोग, चार शेष होवे तो भूतादि दोष कहना चाहिये। यथा - वर्गांकाः २५ श्रेणी ४ गुणिता १०० वर्णांका ३२ मात्रिकांकै ९ र्गुणिता २२८ युक्ता ३८८ युगैस्तष्टा ४ भूतादिदोषोऽस्ति ॥१५॥

प्रकारान्तरेण साध्यादीनाह।

**श्रेणीहलाचां गणना कुयुग्द्विघ्नी त्रिभाजिताः।**
**जीवनं व्याधिबाहुल्यं मरणंशेषितैः क्रमात् ॥१६॥**

श्रेणी की वर्णमात्रासंख्या को सैक करके दो से गुणा करें फिर तीन का भाग दें, एक शेष होवे तो रोगी का जीवन कहना, दो शेष रहे तो बहुत अधिक व्याधि कहना, तीन शेष होवे तो मरण कहना। यथा - श्रेण्यां हलाचां संख्यां ८ कु १ युक् ९ विघ्ना १८ त्रि ३ भक्ताशेषं ३ मरणं दृष्टमिति ॥१६॥

अथगर्भज्ञानमाह।

**मात्राङ्कघ्नं वर्णपिण्डं महीध्रैस्तष्टं शेषैर्नास्ति गर्भः समाङ्कैः।**
**आलिङ्गाद्यैः पुत्रयुक् कन्यकाढ्यः क्लीबाढ्यः स्यात्पञ्चमैर्गर्भहानिः ॥१७॥**

मात्रा पिण्ड से वर्णपिण्ड को गुणा करें, फिर ७ का भाग दे यदि विषम शेष होवे तो गर्भ कहना, सम शेष होवे तो गर्भ नहीं कहना, प्रश्नश्रेणी केआद्यर्ण में आलिङ्गितस्वर होवे तो पुत्र कहना, अभिधूम्र स्वर होवे तो कन्या कहना, दग्धस्वर होवे तो नपुंसक कहना, श्रेणी का प्रथमवर्ण मृत्युसंज्ञक होवे तो गर्भपात कहना चाहिये। यथा- वर्णपिण्डं ३२ मात्रांकै ९ र्गुणितं२८८ महीध्रै ७ स्तष्टं शेषं १विषमांकैर्गर्भोऽस्तीति ॥१७॥

**सूक्ष्मात्पिण्डे स्वेष्टवारर्क्षतिथ्याढ्यं सप्ताप्तं कन्यकायुग्मशेषे।**
**द्व्यंकद्व्याप्तं मासघस्रौ भवेतां गोसूर्यान्तर्जन्मनो मासघस्रौ ॥१८॥**

सूक्ष्मचक्रजन्य पिण्ड को स्वगुणक से गुणा करें, फिर गुणनफल में प्रश्न वार तिथि नक्षत्रयुक्त करें, सात का भाग दे यदि विषम शेष होवे तो पुत्र कहना चाहिए, सम शेष होवे तो कन्या कहना चाहिए। गुणकगुणितपिण्ड में दो सौ बानवे २९२ का भाग देना, शेषांक में ३० का भाग देना, लब्ध मासशेष दिन होते हैं, मास दिवसों का नवमास द्वादश दिनों से अन्तर करे, जो शेष होवे उतने मास दिवस के बाद गर्भमोक्ष कहना चाहिये। यथा- सूक्ष्मचक्रात्पिण्डं ६५ सप्तदश १७ गुणितं ११०५ स्वेष्टवार ६ नक्षत्र ८ शुक्लादि तिथिभि १६ र्युक्तं ११३५ सप्तभि७ र्भक्तं शेषं १ विषमे शेषे सति पुत्रगर्भः। तत्पिण्डं ११३५ द्व्यंकद्व्याप्तं २९२ शेषम् २५९ त्रिंशद्भक्तं लब्धं ८ मासाः शेषं १९ दिनानि मासघस्रौ ८/१९ गोसूर्याणां मासघस्रणां ९/१२ मध्यगतौजातौ ०/२३ प्रश्नसमयात् त्रयोविंशति २३दिनोत्तरं पुत्र जन्म अष्टमास ८ एकोनविंशतिदिनानि गर्भो वर्त्तते इति ॥१८॥

अथ रतिप्रश्नमाह।

**परस्परघ्नोत्तरनीचपिण्डे मात्रांकनिघ्ने नगभक्तशेषे।**
**समे रतिर्नो विषमे रतिः स्यादालिङ्गिताद्यैः सुखमध्यदुःखाः ॥१९॥**

उत्तरार्धवर्णपिण्ड को परस्पर गुणा करें, फिर उसे मात्रांक से गुणा करें सातका भाग दे यदि सम शेष होवे तो रति कहना चाहिए विषम शेष हो तो रति नहीं कहना चाहिये। प्रश्नश्रेणीके आद्यवर्ण में आलिङ्गित स्वर होवे तो सुखपूर्वक रति कहनी चाहिए, अभिधूम्र स्यर होवे तो मध्यम रति कहनी चाहिए, दग्धस्वर होवे तो दुःखसे रति

कहना चाहिए। यथा-उत्तराधरपिण्डे २३/९ परस्परगुणिते २०७ मात्रांकै ९ गुंणिते १८६३ नग ७भक्तं शेषं १ विषमें रतिर्न ॥१९॥

अथ भोजनप्रश्नमाह।

**आलिंगाद्यैः क्रमात्प्रश्ने स्वेष्टं स्वल्पाशनं क्षुधा।**
**पिंडं च केवलं यत्तद्रामाप्तं पूर्ववत्तथा ॥२०॥**

प्रश्नश्रेणीके आद्यवर्ण में आलिङ्गित स्वर होवे तो इच्छापूर्वक भोजन कहना, अभिधूम्र स्वर होवे तो स्वल्प भोजन कहना, दग्धस्वर होवे तो न्यून भोजन कहना, केवल पिण्ड में ३ का भाग देना एकादि शेष करके पूर्वोक्त क्रम से फल समझ लेना चाहिए। यथा-पिण्डं केवलं ४१ रामै ३ र्भक्तं शेषं २ स्वल्पाशनं ज्ञेयमिति ॥२०॥

**आलिंगिताद्येषु तदुत्थपिण्डमाद्यर्णपिंडेन हतं रसाप्तम्।**
**शेषैःक्रमात्तीक्ष्णकटू कषायोऽम्लक्षारमाधुर्यरसाभवेयुः ॥२१॥**

आलिङ्गितादिजन्य पिण्ड को श्रेणीके प्रथम वर्णके पिण्ड से गुणा करें, फिर उसमें ६ का भाग देना, एक शेष होवे तो तीक्ष्णरस, दो शेष होवे तो कटु (कड़वा) तीन शेष रहे तो कषाय, चार रहे तो अम्ल, पांच शेष होवे तो क्षार, शून्य शेष होवे तो माधुर्य (मीठा) रस क्रम से जान लेना चाहिए। यथा-अत्राभिधूमित पिण्डं ४१ तन्मितमेव जातं आद्यर्णपिण्डेन १० गुणितं ४१० रसै ६ र्भक्तं शेषं २ कटुकरसो जातः ॥२१॥

तथान्यमाह।

**द्वादशमात्रासु तथा द्वाभ्यां द्वाभ्यां क्रमात्ते स्युः।**
**उत्तरपूर्वैर्वर्णैर्हास्याऽहास्येति दुःखाढ्यम् ॥२२॥**

अकारादि द्वादश मात्राका दो दो स्वर करके तीक्ष्णादि ६ रस क्रम से जान लेना, प्रश्नश्रेणी के आद्यवर्णमें उत्तरवर्ण होवे तो हास्ययुक्त भोजन कहना, अधरवर्ण होवे तो अहास्य दुःखयुक्त भोजन कहना चाहिए, इसे स्पष्ट रुप से समझने के लिए चक्र में देख लेना चाहिए ॥२२॥

२२ श्लोकोक्तं चक्रम्।

| अ आ | इ ई | उ ऊ | ए ऐ | ओ औ | अं अः |
|---|---|---|---|---|---|
| तीक्ष्ण | कटु | कषाय | अम्ल | क्षार | मधुर |

अथ छत्रभङ्गमाह।

**आलिंगितोत्तरोत्तरयुक्तारिहतेषु नो भंगः।**
**छत्रस्याथ परेषु प्रोक्तो भंगो न सन्देहः ॥२३॥**

यदि प्रश्नश्रेणी का प्रथमवर्ण आलिंगित स्वरयुक्त उत्तरोत्तर होवे तो छत्रभङ्ग नहीं कहना चाहिये, और अधर दग्धवर्ण होवे तो निःसन्देह छत्रभङ्गः कहना चाहिए॥२३॥

**वर्गांकान्वर्णघ्नान् वर्णाङ्कान्मात्रिकाङ्काहतान्।**
**संयोज्य सप्ततष्टे विषमे नो छत्रभंगः स्यात्॥२४॥**

वर्गांक को श्रेणी की वर्णसंख्यासे गुणा करें और वर्णांक को मात्रांक से करें, फिर दोनों के योग में सात का भाग देना, विषम शेष गुणा होवे तो छत्रभंग नहीं कहना, सम शेष होवे तो छत्रभङ्ग जरूर कहना। यथा-वर्गांकान् २५ वर्णैं ४ गुंणितान् १०० वर्णांकान् ३२ मात्रिकांकै ९ गुंणितान् २८८ संयोज्याः ३८८ सप्ततष्टे विषमे शेषे सति न छत्रभङ्गः स्यात्॥२४॥

अथ देशोपद्रवज्ञानमाह।

**क्व १ ग्नी ३ न्द्व १ भ्र० कु १ भू १ ख० भू १ परिमितैः पिण्डं समुद्रैर्हृतं देशोपद्रवता दिशोऽर्णजनिताङ्कघ्नाश्च वर्गाक्षराः। आलिङ्गादिकमात्रिकाङ्कसहिताः सप्तावशेषे फलं। नाशान्तं ह्यतिवृष्ट्यवृष्टिशलभा मूषा निजान्या चमूः॥२५॥**

अवर्गादि अष्ट वर्गो का क्वग्नीन्द्वादि आठ संख्या क्रम से जान लेना तदुत्पन्न पिण्ड में चार का भाग देना, एकादि शेष करके पूर्वादि दिशा में उपद्रव जानना चाहिये। इसी को पिण्ड द्वारा कहते हैं, वर्गांक को वर्णपिण्डसे गुणा करें, फिर आलिङ्गादिचक्रजन्य मात्रांक युक्त करें, उसमें सात का भाग देना एकादि शेष करके क्रम से फल जान लेना। अतिवृष्टिः १, अवृष्टिः २, शलभा ३, मूषा ४, निजाचमू ५, अन्याचमूः६। शून्य शेष होवे तो नाश कहना चाहिए। यथा-क्वादिभिरष्टभिरष्टवर्गकैर्यत्पिण्डं ८ अभिघातगुणेन १७ गुणितं १३६ समुद्रे ४ र्भक्तं शेषं ४ देशेषु उपद्रवो जायते यासु तो दिशः अत्रोत्तरस्यां देशोपद्रव इति वर्गांका २५ अर्णजनितैरंकै ३२ गुंणिता ८०० आलिङ्गादिभवैर्मात्रिकांकैः १३ सहिता ८१३ सप्तावशेषे सति १ अत्रातिवृष्टिः॥२५॥

२५ श्लोकोक्तं चक्रम्।

| १ | ३ | १ | ० | १ | १ | ० | १ |
|---|---|---|---|---|---|---|---|
| अ आ<br>इ ई<br>उ ऊ<br>ए ऐ ओ<br>औ अं अः | क<br>ख<br>ग<br>घ<br>ङ | च<br>छ<br>ज<br>झ<br>ञ | ट<br>ठ<br>ड<br>ढ<br>ण | त<br>थ<br>द<br>ध<br>न | प<br>फ<br>ब<br>भ<br>म | य<br>र<br>ल<br>व | श<br>ष<br>स<br>ह |

*अथ दुर्गभङ्गप्रश्नमाह।*

**संयुक्तोत्तरवर्णैरभिधूम्रैर्नैव भङ्गः स्यात्।**
**अधरायुक्तैर्वर्णैरालिङ्गैः खण्डपातोऽपि॥**
**शेषैर्घोरे युद्धे भंगो दुर्गस्य निर्दिष्टः॥२६॥**

यदि प्रश्नश्रेणी का प्रथम वर्ण उत्तर अभिधूमित स्वरयुक्त होवे तो दुर्गभंग नहीं कहना, अधरवर्ण आलिङ्गित स्वरयुक्त होवे तो खंडपात अर्थात् दुर्ग का किञ्चित् भंग कह देना, और शेष स्वरवर्णो को करके भीषण युद्ध के साथ दुर्ग का भंग कहना चाहिए॥२६॥

**श्रेणी वा मात्रांकाः शिखरघ्नाः संयुता नगैस्तष्टाः।**
**समशेषे भंगः स्याद्विषमे नो दुर्गसंभंगः॥२७॥**

प्रश्नश्रेणी की संख्या को और मात्रापिण्ड को दुर्ग की शिखर संख्या से गुणा करें, दोनों का योग करके ७ का भाग देना, विषम शेष होवे तो दुर्ग भंग नहीं कहना, सम शेष होवे तो दुर्ग भंग कहना चाहिये। यथा श्रेणी ४ अथवा मात्रांकाः ९ कल्पितैः दुर्गशिखरैः १०० गुंणिता ४००। ९०० संयुक्ता १३०० नगै ७ स्तष्टा ५ विषमशेषे सति नो दुर्गसंभंग इति॥ २७॥

तत्र दिग्ज्ञानमाह।

**पिण्डे शिखरैर्निघ्ने नागहृते शेषितैः प्राच्याः।**
**शिखराः प्रयान्ति भंगं वा तच्छिखरोत्थसंख्याप्ते॥२८॥**

निज गुणकगुणित पिण्डको शिखरसंख्या से गुणा करें, फिर ८ का भाग देना, एकादि शेष करके पूर्वादि दिशा में भंग होना जान लेना। अथवा पिण्ड में शिखरसंख्या का भाग देना, जो शेष पूर्वादि दिशा में जहां समाप्त होवे उसी शिखर का भंग कहना चाहिए। यथा-पिण्डे ४१ गुणक १७ गुणिते ६९७ शिखरै १०० गुंणिते ६९७०० नागै ८ र्भक्ते शेषं ४ अत्र नैऋत्यकोणस्थानां शिखराणां भंगः । अथवा पक्षान्तरेण तस्मिन् पिण्डे ६९७ तस्मिन् दुर्गे ये शिखरास्तेभ्य उत्था जाता या संख्या १०० तया भक्ते सति शेषितैः ९७ अङ्कैः पूर्वदिशातो यत्र संख्यासमाप्तिः स एव शिखरो भंगमायातीति॥२८॥

कथं भङ्गो भविष्यति तज्ज्ञानमाह।

**खण्डसंख्या स्वराङ्काढ्यास्त्रितष्टा रूपपूर्वकैः।**
**युद्धेन चातिभयतः सुरङ्गात्खण्डिरीरिता॥२९॥**

खण्डसंख्याको मात्रापिण्ड में युक्त करें, फिर उसमें तीन का भाग दें एक शेष होवे तो युद्ध से खण्ड कहना, दो शेष होवे तो अतिभय के कारण खण्ड कहना, शून्य शेष होवे तो सुरंग से खण्ड कहना चाहिए। यथा-खण्डसंख्याङ्काः ९७ स्वराङ्कैः ९ र्युता १०६ त्रितष्टा १ युद्धेन खण्डो भवतीति ॥२९॥

अथ सुभिक्षादिज्ञानमाह।

**सा लिंगाजुत्तरगे सुभिक्षमधराभिधूमिके मध्यम्।**
**शेषे दुर्भिक्षं स्यात्प्रश्नाद्यर्णस्वराभ्यां च ॥३०॥**

प्रश्नश्रेणी का प्रथम वर्ण उत्तर आलिङ्गित स्वरयुक्त होवे तो सुभिक्ष कहना, अधर वर्ण अभिधूम्र स्वरयुक्त होवे तो मध्यम जानना, दग्ध वर्ण दग्धस्वरयुक्त होवे तो दुर्भिक्ष कहना, प्रश्नश्रेणी का प्रथमवर्ण और मात्रा दोनों से मिलाकर कहना चाहिए ॥३०॥

पिंडेन चाह।

**वर्गजनसंख्यागुणितौ वर्णाजङ्कौ युतौ त्रिभिस्तष्टौ।**
**एकादिशेषतः स्यात् सुभिक्षसमते च दुर्भिक्षम् ॥३१॥**

वर्णपिण्ड और मात्रापिण्ड को वर्गजसंख्या से गुणा करें, फिर दोनों का योग करके तीन का भाग दें यदि एक शेष होवे तो सुभिक्ष, दो अवशिष्ट रहे तो समता, तीन शेष होवे तो दुर्भिक्ष कहना चाहिए। यथा- वर्णाजङ्कौ ३२। ९ वर्गजसंख्याभ्यां २५।५ गुणितौ ८००। ४५ युतौ ८४५ त्रिभि ३ स्तष्टौ २ समताफलं जातमिति ॥३१॥

**अथ वृष्टिज्ञानमाह।**

**वृष्ट्यल्पवृष्ट्यनावृष्टिश्चोत्तरालिंगितादिभिः।**
**मात्रापिण्डं त्रिभिस्तष्टं शेषाङ्कैः पूर्ववत्फलम् ॥३२॥**

यदि प्रश्न श्रेणी का प्रथम वर्ण उत्तर होवे तो वृष्टि कहना चाहिये, और अधरवर्ण हो तो अल्प वर्षा कहना तथा यदि दग्ध होवे तो अनावृष्टि कहना चाहिये। प्रश्न श्रेणी के आद्यवर्ण में आलिंगित स्वर होवे तो वृष्टि कहना चाहिये, अभिधूम्र स्वर होवे तो अल्पवृष्टि कहना और दग्धस्वर होवे तो अनावृष्टि कहना चाहिये। मात्रा पिण्ड को गुणक से गुणा करें और उसमें तीन का भाग दें जिसे एकादि शेष करके पहले की तरह फल क्रम से जानना। यथा- यात्रापिण्डं ९ गुणक १७ गुणितं १५३ त्रिभि ३ स्तष्टं ३ दुर्भिक्ष फलं जातम्।

वृष्टि, अल्पवृष्टि और अनावृष्टि आदि के उत्तर आलिंगित आदि स्वर से मात्रा पिण्ड से तीन का भाग देकर जो शेष अंक बचे उसके अनुसार पूर्व प्रतिपादित फल कहना चाहिए।

कूपादिप्रश्नमाह।

**आलिंगिताद्यादिगतद्गुणेनार्णाङ्कैश्च गुण्या निजवर्णसंख्या।**
**युक्ताविभक्ता धरणीधरैः स्यात् शेषे समे क्षारजलं परेऽन्यत् ॥३३॥**

प्रश्नश्रेणी के आद्यवर्ण में जो आलिंगितादिक स्वर होवे तो उस स्वर का संयुक्तादि प्रकरणोक्त गुणक से श्रेणीवर्णसंख्या को गुणा करें, फिर वर्णाङ्कसे श्रेणीसंख्या को गुणा करके, दोनों का योग करके सात का भाग दे, यदि सम शेष हो तो क्षारजल कहना, विषम शेष होवे तो मिष्टजल कहना चाहिये। यथा-पूर्वोक्त भूकरेत्यादिनात्र गुणकः २ तेन श्रेणिवर्णसंख्या ४ गुणिता ८ वर्णाङ्कै ३२ श्च गुणिता १२८ युक्ता १३६ धरणिधरै ७ र्भक्ता ३ विषमे शेषे सति मिष्टं जलं जातमिति ॥३३॥

तत्र हस्तज्ञानमाह।

**लब्धं पिंडे विनिक्षिप्य चतुरशीति भाजितम्।**
**शेषाङ्कसमहस्तैः स्यात् पानीयं पूर्वनोदितम् ॥३४॥**

पूर्व श्लोकोक्त सात का भाग देने से जो लब्धी आवे, उसको पिण्ड में युक्त करें, फिर चतुरशीति (चौरासी) ८४ का भाग दे, शेषाङ्क के सम हस्त नीचे जल कहना चाहिये। यथा-लब्ध १५ पिंडे १३५ विनिक्षिप्य १५५ चतुरशीति ८४ भक्तं शेषांकैः ७१ समये हस्तास्तैः कृत्वा पूर्वनोदितं क्षारं मिष्टं वा पानीयं स्यात्। अत्र देशकालादिकं विचार्य वाच्यम् ॥३४॥

अथारामप्रश्नमाह ।

**उत्तरालिंगिताद्यैः स्याद् बहुद्रुमयुतं वनम्।**
**विरलद्रुमसंयुक्तं दग्धं वा त्र्याप्तपिण्डतः ॥३५॥**

प्रश्नश्रेणीके आद्यवर्ण में आलिंगित स्वर होवे तो बहुद्रुमयुक्त वन कहें, अभिधूम्र स्वर होवे तो स्वल्प द्रुमयुक्त वन कहें, दग्धस्वर होवे तो वह्नि कीटादिकों से जर्जरित वन कहें, यदि उत्तर वर्णश्रेणी होवे तो विरल द्रुमयुक्त वन कहें, दग्धवर्णाद्य श्रेणी होवे तो वह्नि कीटादिकों से जर्जरित कहें, पिण्ड में तीन का भाग देकर एकादि शेष करके पूर्ववत् फल जानना चाहिये । यथा-पिण्डं ६९७ त्र्याप्तं १ बहुद्रुमयुक्तं जातमिति ॥३५॥

अथ प्रासादप्रश्नमाह ।

**उत्तरालिंगिताद्यैः स्यात्प्रासादं तत्तु शीघ्रतः ।**
**विलम्बेन तथाऽल्पायू रिक्तं वा सद्विपिण्डतः ।।३६।।**

प्रश्नश्रेणी के आदि में उत्तर वर्ण आलिंगित स्वर होवे तो प्रासाद शीघ्र तैयार होगा, दग्धवर्ण अभिधूम्र स्वर होवे तो विलम्ब से प्रासाद तैयार होगा, दग्धवर्ण दग्धस्वर होवे तो प्रासाद का स्वल्प आयु होगा अथवा रिक्त रहेगा, पूर्व पिण्ड में दो युक्त करके तीन का भाग देना, एकादि शेष करके फल क्रम से जान लेना। यथा-द्वाभ्यां २ सहितो यः पिण्डः ६९९ त्रि ३ भक्तं शेषं ३ अल्पायुः रिक्तं वा फलं जातमिति ।।३६ ।।

गृहप्रश्नमाह।

**आलिंगाद्यैर्महालाभं स्वल्पलाभं दरिद्रता ।**
**ङादिदग्धस्वराढ्याश्चेत् कुलच्छेदकरं गृहम् ।।**
**पिण्डं व्याप्तं क्रमाद्गेहे लोभो वृद्धिर्दरिद्रता ।।३७।।**

प्रश्नश्रेणीके आद्यवर्णमें आलिंगित स्वर होवे तो स्थान से लाभ कहना, अभिधूम्र स्वर होवे तो स्वल्प लाभ कहना, दग्ध स्वर होवे तो दरिद्रता कहना। ङादि पांच वर्ण दग्धस्वरयुक्त होवे तो कुल का नाश करने वाला स्थान कहना चाहिए, पिण्ड में तीन का भाग देना एकादि शेष करके क्रम से फल जान लेना चाहिए । यथा-पिण्डं ६९७ त्र्या ३ प्त शेषं १ लाभ इति।।३७।।

अथार्घप्रश्नमाह।

**पिण्डं निजगुणकघ्नं प्रश्नार्णघ्नं त्रिभिस्तष्टम् ।**
**रूपादिभि समर्घं समता ज्ञेया महर्घं च ।।३८।।**

निज गुणकगुणित पिण्ड को श्रेणीसंख्या से गुणा करें, तीन का भाग देने पर यदि एक शेष होवे तो समर्घ, दो शेष होवे तो समता, तीन शेष होवे तो महर्घता कहना चाहिये। यथा-पिण्डं ४१ निज गुणक १७ गुणितं ६९७ प्रश्नार्णै ४ र्गुणितं २७८८ त्रि ३ भिस्तष्टं १ सुभिक्षफलं जातं यन्मितं वर्त्तते ततोऽधिकं स्थास्यति।।३८।।

यत्र समर्घमहर्घे भवेतां तत्र विशेषमाह।

**आलिङ्गादियुते स्यात् पक्षे मासोर्ध्ववर्षोर्ध्वे ।**
**पिण्डं निजगुणकघ्नं प्रश्नार्णाढ्यं रसैस्तष्टम् ।।३९।।**
**पादेनर्द्धिः क्रमतो ह्याद्युत्तरगे ह्यनन्ताभ्रे ।**
**अधरादिगे च हानिः पादैः शन्ये महर्घं तत ।।४०।।**

प्रश्नश्रेणी के आद्यवर्ण में आलिंगित स्वर होवे तो एक पक्ष के भीतर समर्घ महर्घ कहना, अभिधूम्र स्वर होवे तो मासोत्तर समर्घ महर्घ कहना, दग्धस्वर होवे तो वर्षोत्तर समर्घ महर्घ कहना चाहिये। निज गुणकगुणित पिण्ड में श्रेणी के वर्ण की संख्या को युक्त करें, फिर उसमें ६ का भाग दे शेषाङ्कौ से फल का विचार करें। प्रश्नश्रेणी के आदि में उत्तरवर्ण होवे और अंक शेष होवे तो चतुर्थांश वृद्धि दायक कहना, श्रेणी के आदि में उत्तरवर्ण और शून्य अवशिष्ट रहे तो अनन्तवृद्धि दायक कहना, श्रेणी के आदि में यदि अधरवर्ण होवे और अंक शेष होवे तो चतुर्थांश हानि कहना, श्रेणी के आदि में अधरवर्ण होवे और शून्य शेष रहे तो अनन्त हानि कहना चाहिए। यथा-पिण्डं ४१ निज गुणक १७ घ्ने ६९७ प्रश्नवर्ण ४ युतं ७०१ रसै ६ स्तष्टं ५ अत्रादौ उत्तरवर्णोऽभिधूमितः स्वरस्तेन मासात्परं पादयुतं सुभिक्षफलं जातमिति ॥३९॥ ४०॥

अथ गुप्तमन्त्रज्ञानमाह।

**आलिङ्गैर्धर्मचिन्तार्थकामौ चैवाभिधूमिते।**
**दग्धाद्ये विग्रहेच्छा स्याद्भूपतेर्गुप्तमन्त्रणे ॥४१॥**

प्रश्नश्रेणीके आद्यवर्ण में आलिङ्गित स्वर होवे तो धर्मचिन्तायुक्त जप कहना, अभिधूम्र स्वर होवे तो अर्थ और कामसम्बन्धी मन्त्र जप कहना, दग्धस्वर होवे तो विग्रहादियुक्त मन्त्र जप कहना चाहिए। यहाँ राजा का तो उपलक्षण मात्र संकेत है ॥४१॥

पिण्डेन चाह।

**केवलपिण्डं गुणितं स्वालिङ्गितपूर्वगुणकेन।**
**तष्टं त्रिभिश्च शेषैः प्राग्वत्प्रोक्तं फलं प्राज्ञैः ॥४२॥**

केवल पिण्ड को आलिंगितादि स्वरयुक्तजन्य गुणक से गुणा करें, फिर तीन का भाग दे तथा एकादि शेष करके पंडितजन पूर्ववत् फल को जान ले। यथा- केवल पिण्डं ४१ अत्राभिधूम्रगुणकेन २ गुणितं ८२ त्रिभि ३ स्तष्टं १ धर्मचिन्तास्तीति सर्वत्र ॥४२॥

अथास्मिन् पत्रे किमस्तीति ज्ञानमाह।

**मैत्रीलेखं क्षुद्रलेखं नृनार्योः कार्यं तत्रोच्चाटनं मारणं च।**
**पोष्यंशत्रोर्विग्रहाढ्यंक्रमेणसाधारण्यं संयुताद्यष्टवर्गैः ॥४३॥**

संयुक्तादि आठ पक्षों का फल क्रम से जान लेना चाहिए, जिस पक्ष का प्रश्न होवे उस पक्ष का फल मुद्रित (लिफाफे में बन्द) पत्र में कहना चाहिये। अत्र तु मारणं कस्यचिल्लिखितमिति वाच्यम् ॥४३॥

पिण्डेन चाह।

**वर्णाङ्कनिघ्नस्वरपिण्डयुक्तश्रेणीहृता नागमितैश्च शेषैः।**
**प्राग्वत् फलं मुद्रितपत्रलेखे चान्यद्विमृश्यापि वदेत् क्रियाभिः ॥४४॥**

मात्रापिण्डको वर्णपिण्ड से गुणा करें, फिर उसमें श्रेणीसंख्यायुक्त करके ८ (आठ) का भाग देना, एकादि शेष करके पूर्वोक्त फल क्रम से जान लेना। मुद्रितपत्र का प्रश्न कहने में और क्रिया से भी विचार कर कहना चाहिये। यथा- वर्णाङ्कैः ३२ निघ्नौ यः स्वरपिण्ड ९ स्तेन २८८ युक्ता या श्रेणी ४ जाता २९२ सा नागप्रमाणै ८ र्भक्ता शेषैरेकादिभिः ४ प्राग्वन्मैत्रीलेखनमित्यादि। मुद्रितं तत्पत्रं च तत्र लेखे फलं, तेनात्रोच्चाटनवार्त्ता लेखनमिति वाच्यम् ॥४४॥

४३ श्लोकोक्तं चक्रम्।

| पक्षाः | वार्त्ताः |
|---|---|
| दग्ध | साधारणम् |
| अभिधूम्र | शत्रुविग्रहः |
| आलिङ्गित | पोष्यम् |
| अभिघात अनभिघात | मारणम् |
| अनभिहित | उच्चाटनम् |
| अभिहित | नृनार्योः कार्यम् |
| असंयुक्त | क्षुद्रलेखम् |
| संयुक्त | मैत्रीलेखम् |

अथ मृगयाप्रश्नमाह।

**दग्धकटपयशैर्बद्धो मृगयायां घातमायाति।**
**अधरार्णैः संयुक्तैस्त्वन्यैः शून्या भवेन्मृगया ॥४५॥**

प्रश्नश्रेणी के आदि में, ङ ञ ण न म उ ऊ अं अः क ट प य श, यदि ये चतुर्दश (चौदह) वर्ण होवे तो बद्ध मृगया का लाभ कहना। श्रेणी के आदि में आ ई ऐ औ ख घ छ झ ठ ढ थ ध फ भ र व ष ह, यदि ये अष्टादश (अठारह) वर्ण होवे तो मृगया घात कहना और श्रेणी के आदि में, अ इ ए ओ ग च ज ड त द ब ल स, यदि ये त्रयोदश वर्ण होवे तो मृगया लाभ नहीं होवेगा ऐसा कहना चाहिये ॥४५॥

पिण्डेन चाह।

**केवलपिण्डं भूपैर्निघ्नं भक्तं नगैः शेषे।**
**विषमे मृगलाभस्तत्रामाप्युक्तवज्ज्ञेयः ॥४६॥**

केवल पिण्ड को षोडश (सोलह) से गुणा करें: फिर उसमें (सात) ७ का भाग दे विषम शेष होवे तो मृगया लाभ कहना, सम शेष होवे तो लाभ नहीं कहना उसका नाम भी पूर्ववत् जान लेना चाहिए। यथा- केवलपिण्डं ४१ भूपै १६ गुंणितं ६५६ नगै ७ र्भक्तं शेषं ५ विषमे सति मृगयालाभ इति ॥४६॥

अथ युद्धप्रश्नमाह।

**उत्तरवर्णैः सन्धिर्युद्धं ह्यधरैर्द्विहृत्पिण्डम्।**
**युद्धं सन्धिर्दग्धे द्व्याप्तं शून्यं भवेद्युद्धम् ॥४७॥**

प्रश्नश्रेणी का आदि वर्ण उत्तर होवे तो सन्धि कहना, अधर होवे तो युद्ध कहना, पिण्ड में २ का भाग दे और यदि एक शेष रहे तो युद्ध कहना, शून्य शेष होवे तो सन्धि कहना चाहिये। प्रश्नश्रेणी के आदि में दग्धवर्ण होवे तो पिण्ड में दो का भाग देना, यदि एक शेष होवे तो सन्धि कहना, शून्य शेष होवे तो युद्ध कहना चाहिये। यथा- पिण्ड ६९७ द्वि २ हृत् शेषे १ युद्धं, दग्धे सति पिण्डं ६९७ द्वाभ्यां २ भक्तं १ शेषे सति सन्धिरिति ॥४७॥

**रूपे १ ष्व ५ ङ्गा ६ ब्ध्य ४ भ्रे० न्द्व १ ग्नि ३ द्विरमितैश्च वर्गाङ्कैः।**
**पिंडे द्विनामजातेऽद्र्याप्ते शेषेऽधिके जेता ॥४८॥**

अवर्गादि आठ वर्गो की एकादि संख्या क्रम से जान लेना, फिर वादी प्रतिवादी नामजन्य पिण्ड में (सात) ७ का भाग देना, जिस जगह बहुत अधिक शेष होवे उसी का जप कहना। यथा- रामरावणयोर्नामभ्यां जाते पिण्डे ६।१३ अद्रिभि ७ र्भक्ते ६।६ समे शेषे अत्रातिघोरयुद्धमिति सन्धिर्वा ॥४८॥

४८ श्लोकोक्तं चक्रम्।

| १ | ५ | ६ | ४ | ० | १ | ३ | २ | अङ्काः |
|---|---|---|---|---|---|---|---|---|
| अ आ<br>इ ई<br>उ ऊ<br>ए ऐ ओ<br>औ अं अः | क<br>ख<br>ग<br>घ<br>ङ | च<br>छ<br>ज<br>झ<br>ञ | ट<br>ठ<br>ड<br>ढ<br>ण | त<br>थ<br>द<br>ध<br>न | प<br>फ<br>ब<br>भ<br>म | य<br>र<br>ल<br>व | श<br>ष<br>स<br>ह | वर्णाः |

अथ दिग्बलमाह ।

**मासाश्चैत्रादिगता द्विघ्नास्तिथ्यान्विताः समुद्राप्ताः ।**
**शून्यं० द्वीं २ द्व २ ग्नि३मितैः पूर्वादिस्थो भवेज्जेता ॥४९॥**

चैत्रशुक्लादि गत मासों को (दो) २ से गुणा करें, फिर उसमें तिथियुक्त करके (चार) ४ का भाग दे तथा उसे शून्यादि शेष करके क्रम से पूर्वादि दिक्स्थित मल्ल कुक्कुटादियों की विजय जान लेना चाहिये। यथा- चैत्रशुक्लादितो गतमासाः ९ द्विगुणिताः १८ शुक्लादिगततिथिभि १५ र्युताः ३३ समुद्रै ४ र्भक्ताः शेषं १ अत्र एकशेषे सति पश्चिमदिक्स्थो यः स जेष्यति ॥४९॥

अथ विवाहप्रश्नमाह।

**उत्तराजर्णयुक्ताद्ये शीघ्रं नीचे विलम्बतः ।**
**दग्धाजर्णयुताद्ये स्यान्न विवाहः कदाचन ॥५०॥**

यदि प्रश्नश्रेणी की आदि के उत्तर स्वरवर्ण होवे तो शीघ्र विवाह कहना, तथा यदि अधर स्वरवर्ण होवे तो विलम्ब से विवाह होना कहना, और यदि दग्ध स्वरवर्ण होवे तो विवाह नहीं होवेगा ऐसा कहना चाहिये ॥५०॥

पिण्डेन चाह।

**स्यादुत्तरार्णाढ्यमुखेऽर्णपिण्डं त्रिघ्नं स्वराङ्काढ्यमदोधराढ्यम्।**
**वर्णांकमब्धिघ्नमजंकहीनं सप्तोद्धृते चेद्विषमे विवाहः ॥५१॥**

प्रश्नश्रेणी के आदि में उत्तरवर्ण होवे तो वर्णपिण्ड को त्रिगुणित करें, और गुणनफल में मात्रापिण्ड युक्त करके सात का भाग दे, श्रेणी के आदि में अधरवर्ण होवे तो वर्णपिण्डको चतुर्गुणित करके उसमें मात्रापिण्ड हीन करें, फिर उसमें सातका भाग दे, यदि विषम शेष होवे तो विवाह कहना, सम शेष होवे तो विवाह नहीं कहना चाहिये। यथा-उत्तरेणार्णेन युक्तं मुखम् आदिर्यस्य तस्मिन् प्रश्ने सति वर्णपिण्डं ३२ त्रिगुणितं ९६ स्वरांकै ९ र्युक्तं १०५ सप्त ७ भिर्भक्तं शेषं ७ विषमशेषेण विवाहो भविष्यतीति ॥५१॥

अथ कृष्यादिप्रश्नमाह।

**लाभमलाभं कष्टं ह्यालिङ्गाद्यैश्च कृष्यादौ ।**
**सूक्ष्मांके वर्णघ्नेऽद्र्याप्ते विषमे तथा लाभः ॥५२॥**

प्रश्नश्रेणी के आद्यवर्ण में आलिङ्गित स्वर होवे तो लाभ कहना, अभिधूम्र स्वर होवे तो लाभ नहीं कहना, दग्धस्वर होवे तो कष्ट कहना चाहिये। कृष्यादि प्रश्न में सूक्ष्मचक्र से पिण्डोत्पादन करके उस पिण्ड को श्रेणीवर्णसंख्या से गुणा करें और उसमें सात का भाग दे यदि विषम शेष होवे तो लाभ कहे, सम शेष होवे तो लाभ नहीं कहना। यथा-सूक्ष्मपिण्डे ६५ वर्णै ४ गुंणिते २६० सप्त ७ हृते १ विषमे शेषे सति कृष्यादौ इति ॥५२॥

अथ मैत्र्यादिकरणप्रश्नमाह।

**आलिङ्गाद्यैर्हितादीच्छोः सौख्यं दुःखं च कष्टता।**
**वर्णसंख्यास्वरांकघ्नी त्रिभक्ता पूर्ववत् फलम् ॥५३॥**

यदि प्रश्नश्रेणी के आद्यवर्ण में आलिङ्गित स्वर होवे तो मैत्रीकरण में इच्छा सौख्य कहना, अभिधूम्र स्वर होवे तो दुःख कहना, दग्धस्वर होवे तो कष्ट कहना। श्रेणी संख्या को मात्रापिण्ड से गुणा करके तीन का भाग देना, एकादि शेष का पूर्ववत् फल जान लेना। यथा वर्णसंख्या ४ स्वरांकै ९ गुंणिता ३६ त्रिभक्ता ३ त्रिशेषे सति मैत्रीसेवासम्बन्धादिषु कष्टतास्तीति ॥५३॥

अथ योन्यन्तरप्रश्नमाह।

**आलिङ्गाद्यैः क्रमात्स्वर्गे मर्त्ये नरकयोनिषु।**
**उत्तरादियुतैर्ज्ञेया उत्तमा मध्यमा परा ॥५४॥**

यदि प्रश्नश्रेणी के आद्यवर्ण में आलिङ्गित मात्रा होवे तो स्वर्गलोक में योनि कहना, अभिधूम्र स्वर होवे तो मर्त्यलोक में कहना, दग्ध स्वर होवे तो नरकलोक में कहना, यदि प्रश्नश्रेणी के आदि में उत्तर वर्ण होवे तो स्वर्गादि लोक में उत्तम योनि कहना, अधरवर्ण होवे तो मध्यम योनि कहना, दग्धवर्ण होवे तो अधम योनि कहना चाहिये ॥५४॥

पिंडेन चाह।

**प्रश्नाद्यवर्गपिण्डं निजगुणकघ्नं त्रिभिर्भक्तम्।**
**शेषैः प्राग्वज्ज्ञेयं नामाद्यं चापि विद्वद्भिः ॥५५॥**

प्रश्नश्रेणी के प्रथम वर्ण के वर्गाङ्क को निज गुणक से गुणा करें, उसमें तीन का भाग दें और एकादि शेष करके स्वर्ग १, मर्त्य २, नरक ३ लोक आदि जान लेना चाहिए। यथा-प्रश्ने आद्यो यो वर्गस्तस्य पिण्डं ६ निजेन गुणकेन १७ गुणितं १०२ त्रिभि

३ भक्तं शेषं ३ नारकीययोनिर्जाता। च पुनरस्या योनेर्नामाद्यमपि प्राग्वत् विद्वद्भिर्ज्ञेयम् ॥५५॥

अथ निधिज्ञानमाह।

**नास्त्यत्र यद्वा धनमस्ति किञ्चिद्वदेति पृष्टेऽहिबलाख्यचक्रम्।**
**सन्दिग्धभूमौ विदुषात्र लेख्यं तात्कालिकर्क्षोत्थविधुश्च कार्यः ॥५६॥**

यदि कोई प्रश्नकर्ता प्रश्न करें कि इस मकान में द्रव्य (धनादि) है या नहीं उस समय अहिबल चक्र को सन्दिग्ध भूमि में पण्डितजन लिखकर इसका निश्चय करें, अहिबल चक्र के विषय में तात्कालिक नक्षत्रजात चन्द्र सूर्य का स्पष्टीकरण करें ॥५६॥

तदेवाह।

**सूर्योदयाद्यातघटीभघाताभ्राङ्गांशकं भादिगतर्क्षयुक्तम्।**
**तत्कालभं तद्युगघातनन्दभागोऽत्र तत्कालखगो गृहादिः ॥५७॥**

तात्कालिक सूर्यादि ग्रहों की स्पष्टीकरण की क्रिया लिखते है, स्वेष्टकाल को कर्मभूमि में स्थित करके सप्तविंशति (सत्ताईस) २७ से गुणा करें, उसमें ६० (साठ) का भाग देने से लब्ध भादिक होते हैं, उनको गत नक्षत्र में युक्त करने से तात्कालिक नक्षत्र होते हैं, तात्कालिक नक्षत्र को चतुर्गुणित करके ९ का भाग देने से लब्ध राश्यादि स्पष्ट ग्रह होते हैं। अब उदाहरण देते हैं, सम्वत् १९४८ शालिवाहन शके १८१३ माघमासे कृष्णे पक्षे तिथौ तृतीयायां रविवासरे सूर्योदयात्कल्पितामिष्टं घट्यादिः ३७।१२ अत्र रविस्पष्टम् ९।४।५०।३६ चन्द्रस्पष्टम् ४।१६।४६।१ लग्नस्पष्टम् ५।२।१६।५१ सूर्योदयाद्यातघटीनां ३७/१२ सप्तविंशति २७ मितानां च यो घातो १००४/२४ ऽस्य अभ्राङ्गांश ६०कं नक्षत्रादि १६।४४।२४ तत् अश्विनीतो गतनक्षत्रैः स्फुटघटीयुक्तैरिति विशेषोऽत्र। तदित्थं भेतं भभोगहृद्भक्तभाढ्यमिति भस्य इतं घट्यादि १६।४९ भस्य भभोगेन सर्वघटीमानेन ६५।१८ हृतं लब्धं ००।१५।२७।६ अश्विन्यादिगतभै १० र्युतं १०।१५।२७।६ जातैरश्विन्यादिगतनक्षत्रै १०।१५।२७।६ र्युक्तं २६।५६।५९।६ तात्कालिकं नक्षत्रं जातं तात्कालिकर्क्षस्य युगा ४ नां च यो घात १०७।५९।२४।२५ स्तस्य नन्दां ९ शो गृहादिराश्यादिः स्पष्टचन्द्रः ११।२९।५८।१ अत्र तु नक्षत्रस्यैव प्रयोजनमस्ति तथापि प्रसंगात्प्रकटनांशज्ञानार्थ विधोः प्रदर्शित इति।

अब सूर्यका तात्कालिकीकरण लिखते हैं, प्रथम भभोगभयात साधन करते हैं। पौषशुक्ल १० शनौ उत्तराषाढायामर्कः ३७।२८ दिन को ६० में शोधन किया तो २२।३२ हुआ, माघकृष्णा ८ शुक्रे श्रवणेऽर्कः ४०।४२ इन दोनों का अन्तर वार १२

को ६० (साठ) से गुणा किया तो ७२० हुआ, इसमें २२/३२ और ४०/१२ युक्त किया तो ७८२।४४ भभोग हुआ, माघकृष्णा ३ रवौ सूर्योदयाद्गतघटि २७।१२ में पूर्व में शोधित अङ्क २२।३२ युक्त किया ५९।४४ और अन्तर वार ७ को ६० से गुणा किया ४३० और उसमें युक्त किया तो ४७९।४४ भयात हुआ, भयात में भभोग का भाग लेने से लब्ध गत नक्षत्र की स्पष्टघटी होती है। यथा-भस्य इतं घट्यादिः ४७९।४४ भभोगेन सर्वघटीमानेन ७८२।४४ हृतं लब्धं ०।३६।४६।२५ अश्विन्यादिगतभै २० र्युतं २०।३६।४६।२५ जातैरश्विन्यादिगतनक्षत्रै २०।३६।४६।२५ रभ्राङ्गांशकै १६।४४।२४ र्युक्तं ३७।२१।१०।२५ तात्कालनक्षत्रं जातं सप्तविंशति २७ भिस्तष्टं १०।२१।१०।२५ तात्कालर्क्षस्य युगा ४ नां च यो घात ४१।२४।४१।४० स्तस्य नन्दां ९ शो राश्यादि स्फुटरविः ४।१८।२।१९ इस प्रकार से साधित किया गया सूर्यचन्द्र का तात्कालिक करना लिखा गया है यह कष्टसाध्य तो होता है। अब हम बालबोध के लिये अर्थ का सुगमतर प्रकार लिखते है, दोनों क्रिया करने से फल एक ही आवेगा। स्वेष्टकाल में पांच का भाग दें लब्धराशि होती है, शेष को ३० (तीस) से गुणा करके फिर पांच से भाग दे लब्धअंश होती है, फिर शेष को (साठ) से ६० गुणा कर पांच का भाग दे लब्ध घटी होती है, इन राश्यादिकों को संज्ञातन्त्रका सूर्यादि स्पष्ट ग्रहों में युक्त करने से तात्कालिक ग्रह स्पष्ट हो जाते हैं, क्योंकि संज्ञा तन्त्र का स्पष्ट ग्रह बताने को तो साधारण ब्राह्मण भी जानते हैं। यथा- सूर्योदयाद्गतघटी ३७।१२ पञ्च ५ भक्तं राशि ७ शेष २/१२ त्रिंशद्गुणितं ६६/०० पञ्चभक्तं लब्धं १३ अंशाः शेषं १ षष्टि ६० घ्नपञ्चभक्तं लब्धं १२ घटिका इन राश्यादिकों को ७।१३।१२।०० संज्ञातन्त्र का स्पष्ट चन्द्रमा ४।१६।४६।१ में युक्त किया तो ११।२९।५८।१ तात्कालिक चन्द्र पूर्वस्पष्ट समान हुआ, इस प्रकार सर्व ग्रह तात्कालिक कर लेना चाहिये ॥५७॥

अन्त्यं न्यासमाह।

**अन्त्यत्रिवह्निः पितृभत्रिभानि भाजांघ्रितत्वाब्ध्यहिपुष्यसूर्याः।**
**विधिः श्रवः सिद्धशशित्रिचित्राविश्वाद्विलोमं नगभानि चक्रे ॥५८॥**

तिर्यक्पंक्ति का क्रम करके अहिवलय चक्र का न्यास कहते है, अश्विन्यादि तीन नक्षत्र, कृत्तिका मघादि तीन नक्षत्र यह सात नक्षत्र प्रथम पंक्ति में लिखे, भसंख्या उत्तराभाद्रपद, पूर्वाभाद्रपद, शतभिषा, रोहिणी, आश्लेषा, पुष्य, हस्त सात नक्षत्र द्वितीय पंक्ति में लिखे, अभिजित् श्रवण धनिष्ठा, मृगशिर, आर्द्रा, पुनर्वसु, चित्रा यह सात नक्षत्र तृतीय पंक्ति में लिखें, उत्तराषाढा, पूर्वाषाढा, मूल, ज्येष्ठा, अनुराधा, विशाखा, स्वाती यह सात नक्षत्र चतुर्थ पंक्ति में लिखें ॥४८॥

प्रकारान्तरेणाह।

**ऊर्ध्वमध्यभवे कोष्ठे वह्निं कृत्वा भुजङ्गवत्।**
**दत्त्वा भानि लिखेच्चक्रं तदेवाहिबलं भवेत्॥५९॥**

ऊर्ध्व सप्तक पंक्ति का मध्य कोष्ठ में कृत्तिका नक्षत्र देकर के भुजंगवलयवत् नक्षत्र क्रम से लिखें तो अहिवलय चक्र का निर्माण होगा॥५९॥

५८।५९ श्लोकोक्तं अहिवलयचक्रम्॥

| रे चं | अ चं | भ चं शाखा | कृ चं द्वार | म चं शाखा | पू सू | उ सू |
|---|---|---|---|---|---|---|
| उ सू | पू चं | शसू | रो सू | श्ले चं | पु चं | ह सू |
| अभिचं | श्र चं | ध सू | मृ सू | आ चं | पु चं | चि सू |
| उ चं | पू चं | मू सू | ज्ये सू | अनुसू | विसू | स्वासू |

अथ चन्द्रार्कयोर्नक्षत्राण्याह।

**स्युश्चन्द्रर्क्षाण्यब्धिपश्चाब्धिभान्यन्त्येशांऽभोभ्योजांघ्रितोऽन्यानि भानोः।**
**स्वर्क्षे चन्द्रे स्यान्निधिस्तत्र चार्के तत्तद्द्रव्यं तद्दृशागोंऽशहस्तैः॥६०॥**

सूर्य चन्द्र नक्षत्र का ज्ञान कहते है, रेवत्यादि चार, आर्द्रादि पांच पूर्वाषाढादि चार और पूर्वाभाद्रपदा यह चतुर्दश (चौदह) नक्षत्र चन्द्रमा के कहे गये हैं इनसे व्यतिरिक्त चतुर्दश नक्षत्र सूर्य का कहे गये हैं, तात्कालिक चन्द्र सूर्य चन्द्र नक्षत्र में होवे तो सन्दिग्ध भूमि में निधि कहना चाहिये। यहाँ इतना ही वर्णन है, नरपति ग्रन्थ में विषय विशेष लिखा है उसका वर्णन करते हैं। **'द्वारशाखे मघायाम्ये द्वारस्था कृत्तिका मता। चन्द्रऋक्षे यदार्केन्दू तत्रास्ति निश्चितं निधिः। भानुऋक्षे स्थितौ तौ चेत्तदा शल्यं च नान्यथा स्वस्वभे द्वितयं ज्ञेय नास्ति किञ्चिद्विपर्यये॥ स्थितं न लभते द्रव्यं चन्द्रक्रूरग्रहान्विते। पुष्टे चन्द्रे भवेन्मुद्रा क्षीणे चन्द्रेऽल्पको निधिः॥'** तात्कालिक चन्द्रमा को जो जो ग्रह देखते हैं उन ग्रहों का द्रव्यनिधि स्थान में कहना, चन्द्रभुक्त नवांश संख्या करके उतने हस्त (हाथ) परिमित भूमि के नीचे द्रव्य कहना चाहिये॥६०॥

अथ द्रव्यमाह।

**स्वर्णं रौप्यं ताम्रकं रत्नयुक् स्वं वंगं नागं लोहमुक्तं क्रमेण।**
**चन्द्रेऽर्काद्यैर्वीक्षितेऽल्पादिचन्द्रात् व्यस्तर्क्षस्थौ वारिभेऽस्मिन्न लाभः॥६१॥**

सूर्यादि ग्रहों का स्वर्णादि धातु क्रम से जान लेना, चन्द्रमा जिस ग्रह के निमित्त दृष्ट होवे उस ग्रह का द्रव्य कहना चाहिये, कोई ग्रह करके भी दृष्ट नहीं होवे तो द्रव्य का अभाव कहना चाहिये, चन्द्रमा हीन बल होवे तो स्वल्प द्रव्य कहना, मध्यम बली होवे तो मध्यम द्रव्य कहना, चन्द्रमा उत्तम बली होवे तो पूर्ण द्रव्य कहना चाहिये, चन्द्रमा सूर्य के नक्षत्रों में होवे और सूर्य चन्द्रमा के नक्षत्रों में होवे अथवा चन्द्रमा शत्रुराशि का होवे तो द्रव्य लाभ नहीं कहना चाहिए। यहाँ इस विषय में इतना ही लिखा है, और नरपतिग्रन्थ में विशेष लिखा है उसे लिखते हैं, **'मिश्रैर्मिश्रं भवेद्द्रव्यं शून्यं दृष्टिविपर्यये। सर्वग्रहेक्षिते चन्द्रे निर्दिष्टोऽसौ महानिधिः। शुभक्षेत्रगते चन्द्रे लाभः स्यान्नात्र संशयः। पापक्षेत्रे न लाभो हि विज्ञेयः स्वरपारगैः।** अत्र निधिस्थानस्य द्वारज्ञानं नोक्तं तत्तु गुरुगम्यम्। अहिवलयचक्रमिदम् अहिः शेषनागः स तु सिंहार्कतस्त्रिभिर्मासैः ऐशान्यादिविदिक्षु शिरः कृत्वा वामपार्श्वेन शेते तेन यत्र तच्छिरः तत्र निधिस्थानस्य द्वारं तथा चक्रमिदं स्थाप्यम्। यद्वा द्वारस्था कृत्तिका पतति इति तद्गृहद्वारे स्थापयेत्। मुख्यः पक्षोऽयम्। चन्द्राधिष्ठितं तत्कालनक्षत्रं यद्दिग्द्वारभे भवति कृत्तिकादिसप्तसप्तव्यवस्थया तद्दिग्द्वारं निधिस्थानम्। अथवा प्रश्नकर्ता निधिनाथो यत्र दिशि यत्स्थाने विशति तद्द्वारं निधिस्थानस्य। इदमेव कृतं पक्षत्रयादपि निधिं साधयेत्।' इस उदाहरण में चन्द्र सूर्य दोनों स्वस्वनक्षत्र में स्थित है, इसलिए निधिशल्य दोनों कहना चाहिये ॥६१॥

६१ श्लोकोक्तं चक्रम्।

| सू. | चं. | मं. | बु. | बृ. | शु. | श. | ग्रहाः |
|---|---|---|---|---|---|---|---|
| स्वर्ण | रौप्य | ताम्र | रक्तयुक्त द्रव्य | रंग | सीस | लौह | धातवः |

**अथ नष्टजातकाद्यानयनमाह।**

**दन्ता ३२ ष्टे ८ न्द्व १ र्क १२ धृत्या १८ द्रि ७ गज ८ हिमकराः १ श्रेणिघाताः क्रमेणा। -ब्दा मासाः पक्षतिथ्यर्क्षतनुभदिनपाः स्युः स्वसंख्याप्तशेषाः। नष्टेऽथो त्र्य ३ ब्धि ४ काष्ठाः १० शर ५ गुण ३ गुणिताः प्रश्नवर्णाः स्वसंख्या। आप्तास्तिथ्यो मासतारातनुदिनपतयो गर्भकालेऽत्र शेषाः ॥६२॥**

निधिप्रश्न कथनानन्तर नष्टजातकानयन प्रकार का वर्णन करते हैं, दन्तादि ३२ अष्ट संख्या को कर्मभूमि में स्थित करके सूक्ष्मचक्रजन्य स्फुटश्रेणीपिण्ड से गुणा करें, फिर शतादि स्वस्व संख्या करके १००।१२।२।१५।२७।१२।१२।७ का उसमें भाग

दें, शेषाङ्क से वर्ष मास पक्ष तिथि नक्षत्र लग्न राशि वार क्रम से नष्टजातक के विषय में स्पष्ट जान ले। पुनः स्फुटश्रेणीपिण्ड को त्र्यादि ३।४।१०।५।३ संख्या करके गुणा करें, स्वस्व संख्या ३०।१२।२७।१२।७ करके भाग ले शेष तिथ्यादिक गर्भकालके विषय में जान लेना चाहिये। यथा - श्रेणी चात्र स्फुटा ग्राह्या सा च चतुर्गुणितस्वान्त्यवर्गाङ्केन युता भवति, वर्गाङ्कश्च सूक्ष्मचक्राद् इह तस्यैव प्राधान्यात्। तदुक्तं 'श्रेणीप्रश्नाक्षराणां तदुदधिगुणितं स्वान्त्यवर्गेण युक्तेति।' उदाहरणम्। श्रेणी ४ स्वान्त्योरस्य वर्गो यस्तस्याङ्कैः १० वेंदगुणै ४० र्युक्ता ४४ स्फुटश्रेणी जाता। अस्य दन्तादिभ्यो घातः १४०८।३५२।४४।५२८।७९२।३०८।३५२।४४। वर्षादीनां संख्याभि १००।१२।२।१५।२७।१२।१२।७ र्जिताः शेषं ८।४।२।३।९।८।४।२। जाता वर्षाद्याः नष्टजातके एवं सर्वत्र। अथ त्र्यादिगुणिता स्वस्वसंख्या आप्ता प्रश्नवर्णाः कार्या, अत्र ये शेषास्ते गर्भकाले तिथ्यादयः स्युरिति। स्फुटवर्णाः ४४ त्र्यादिगुणिताः १३२।१७६।४४०।२२०।१३२। तिथ्यादीनां या संख्या ३०।१२।२७।१२।७ ताभिर्भक्ताः शेषे तिथ्यादयः १२/५/८/४/६ प्रश्नसमयादूह्यं ज्ञेयमिति ॥६२॥

अथ वर्णोत्पत्तिप्रकारमाह।

**रूढिजफलपुष्पाणि च दूतमुखे सन्ततं यान्ति।**
**तस्मादङ्कैर्वर्णाः प्रश्ने कार्याश्च दूतोक्तैः ॥६३॥**

रूढि शब्द नालिकेर चम्पकादि फल पुष्प अभ्यासवश करके दूतमुख से निरन्तर निकलते हैं, इस कारण अंक चिन्तन करवाना चाहिये ॥६३॥

तदेवाह।

**प्रथमांके गजभक्ते द्वितये बाणोद्धृते त्रितये।**
**द्वादशतष्टे क्रमतो वर्गार्णजः पुनश्चैवम् ॥६४॥**

दूत मुख द्वारा तीन अङ्क भिन्न-भिन्न चिन्तन करवाना, प्रथम अंक में आठ का भाग देना, शेषांक से अवर्गादिक वर्ग जान लेना, द्वितीय में पांच का भाग देना, शेषांक से वर्ण जान लेना, य श वर्गों में चार के भाग से वर्ण जान लेना, तृतीय अंक में द्वादश का भाग देना, शेषांक से अकारादि मात्र जान लेना, इस प्रकार बारबार करना चाहिये ॥६४॥

एतत्सीमानं प्रश्ननियमं चाह।

**कार्यं द्वाभ्यामूर्ध्वं न्यूना बाणैर्यथार्णाः स्युः।**
**स्वरवाहस्थेऽथार्के विषमाश्चन्द्रे समार्णाश्चेत् ॥६५॥**

दो से ऊर्ध्व (ऊपर) पांच से न्यून (कम) वर्ण होते हैं, वहन् नाडीप्रदेशस्थित दूत प्रश्न करे तो यथार्थ फल मिलता है, सूर्यनाडी में विषमवर्ण होते हैं, चन्द्रनाडी में समवर्ण होते हैं ॥६५॥

अथ ग्रन्थसमाप्तिमाह।

**रचितोऽयं संक्षेपात्केरलिशास्त्रस्य सन्दर्भः।**
**अत्राज्ञताभ्रमाभ्यां कुकृतं तच्छोधनीयं ज्ञैः ॥६६॥**

यहाँ पर आचार्यजी ने केरलशास्त्र का प्रबंध संक्षेप करके जो रचना की है इस प्रबन्ध में अज्ञता और भ्रम करके जो स्खलित हुआ उस विषय का पण्डितजन शोधन करें ॥६६॥

**आस्ते यद्वसुधाविभूषणमणौ श्रीमद्व्रजेसद्व्रजे**
**रम्यं काम्यवनं त्रयीधुतमलास्तस्मिन्वसन्ति द्विजाः।**
**श्रीकृष्णाश्रयदीपचन्द्रतनयो यो नन्दरामाभिधं**
**स्तेषा संस्कृतवान् प्रबन्धममलं सत्प्रश्नरत्नाह्वयम् ॥६७॥**

पृथ्वी की जो आभूषण मणि शोभायमान व्रजभूमि जिसमें महात्मा लोग निवास करते है, ऐसा जो काम्यवन जिसमें वास करने वाले वेदत्रयी करके धोये हैं मल जिन्होंने ऐसे जो ब्राह्मण उनके मध्य में श्रीकृष्ण के आश्रय जो दीपचन्द्र उनके पुत्र नन्दराम जी ने यह निर्मल प्रश्नरत्न नामक ग्रन्थ की रचना की है ॥६७॥

अथान्येषां दूषणमाह।

**प्रोक्तं चन्द्रोन्मीलनं शुक्लवस्त्रैस्तच्चाशुद्धं विज्ञनिन्द्यं समन्तात्।**
**वाच्यं तज्ज्ञैः पक्षपातं विहायोत्पाताभिख्येऽस्मिन्न तेषां त्रपाभूत् ॥६८॥**

श्वेताम्बर नाम जैनो ने जो चन्द्रोन्मीलन नाम ग्रन्थ रचना की है वह छन्दोव्याकरणादिकों के कारण अशुद्ध है, अतएव पण्डित लोगों की सभा के विषय में निन्दित है, जिसके जाननेवाले पण्डितों ने हमारा और उनका पक्ष छोडकर कहना चाहिये कि इस उत्पात नाम चंद्रोन्मीलन ग्रंथ के करने में उनको लज्जा हुई या नहीं हुई, जिसमें ग्रहण का स्पर्शादि पञ्च संस्कार उनके मध्य में मीलन उन्मीलन नाम संस्कार मोक्ष अर्वाचीन हैं, राहु से तो चन्द्रमा के मीलन उन्मीलन होते है। इसी कारण से चंद्रोन्मीलन ग्रंथ का भी नाम दूषित हुआ। इसी से बौद्ध लोगों को लज्जा होनी चाहिए कि जिसके नाम ही में दूषण है तो उससे क्या फलसिद्धि होती है? ॥३८॥

अथ समाप्तिकालं ग्रन्थसंख्या चाह।

**सिद्धाष्टचन्द्रवर्षेऽश्वियुजः सितपक्षसप्तम्याम्।**
**पूर्तिमगाद्ग्रन्थोऽयं शून्याब्धिद्विप्रमैर्वृत्तैः ॥६९॥**

विक्रमसंवत् १८२४ में आश्विन शुक्ला सप्तमीके दिन, ग्रन्थ पूरा हुआ, इस ग्रन्थ में दो सौ चालीस २४० वृत्त हैं ॥६९॥

**अष्टवेदाङ्कभू १९४८ वर्षे कृता सुन्दरसूरिणा।**
**माघकृष्णत्रयोदश्यां टीकेयं पूर्णतामगात् ॥७०॥**

*इति प्रश्नरत्नसुन्दरीटीकायां*
*मिश्रप्रकरणं पञ्चमम्।*

*इति डॉ० भास्कर शर्म 'श्रोत्रिय' विरचितायां शची नाम्नी भाषाटीकासहितं केरलीप्रश्नरत्नं समाप्तम् ॥*

## डॉ. भास्कर शर्मा 'श्रोत्रियः'

**संस्तवः**

| | | |
|---|---|---|
| **पितृनाम** | – | श्री सीताराम शास्त्री 'श्रोत्रिय' |
| **जन्मस्थानम्** | – | जयपुरम् (राज.) |
| **योग्यता** | – | ज्योतिषाचार्यः– लब्धस्वर्णपदकः<br>एम. ए. संस्कृत, पी. एच. डी. (ज्योतिष) |
| **लेखनम्** | – | विविध पत्रपत्रिकादि में शोधलेख प्रकाशित |
| **प्रकाशितग्रन्थ** | – | प्रस्तर-वेधशाला, प्रासाद-मण्डनम् (वास्तु-विज्ञानम्) केतकी ग्रहगणितम्, गोलीय रेखागणितम्, पञ्चाङ्ग विज्ञानम्, वैजयन्ती पञ्चाङ्ग गणितम्, वास्तु फेंगशुई द्वारा सुख समृद्धि तथा सफलता वास्तु फेंगशुई तथा पिरामिड के चमत्कार, पाद-रेखा-विज्ञान |
| **सम्पादन** | – | श्री सर्वेश्वर व्रतोत्सव भास्कर (पञ्चाङ्गम्), श्री निम्बार्क पञ्चाङ्गम् श्री निम्बार्क व्रतोत्सव दीपिका, शुभैषी पत्रिका (त्रैमासिकी) |
| **पुरस्कार** | – | विज्ञान-पुरस्कार (ज्योतिषविज्ञान) 2000 राज्यस्तरीय<br>(राजस्थान-संस्कृत-अकादमी, जयपुर)<br>माहेश्वर-पुरस्कार (वास्तु-विज्ञान) 2001 राज्यस्तरीय<br>(श्री व्यासबालाबक्षशोध संस्थान जयपुर)<br>विद्वत सम्मान पुरस्कार (संस्कृत शिक्षा राजस्थान सरकार)<br>सवाई जयसिंह पुरस्कार (सिटी पैलेस, जयपुर) |
| **सम्मान** | – | निम्बार्क भूषण, अखिल भारतीय निम्बार्काचार्य पीठ,<br>सलेमाबाद, अजमेर |
| **कार्यक्षेत्र** | – | आचार्य एवं अध्यक्ष, (ज्योतिष विभाग)<br>राजस्थान संस्कृत विश्वविद्यालय, जयपुर |
| **निवास संकेत** | – | म. नं. 4847, श्रोत्रिय वीथी, कुंदीगर भैरव मार्ग, जौहरी बाजार, जयपुरम् (राज.) दूरभाष : 2573178 |


**जगदीश संस्कृत पुस्तकालय**

**JAGDISH SANSKRIT PUSTAKALAYA**

*(Oriental Publishers & Booksellers)*

शोरूम : भगवानदास मार्केट के सामने, तेलीपाड़ा की गली, चौड़ा रास्ता, जयपुर-302002
हैड ऑफिस : झालानियों का रास्ता, किशनपोल बाजार, जयपुर-302001 (राज.)

Tel. : 0141-2562577, 4026371 (O) 2321518 (R) Mob. : 9414042201

9789380857305